इति हारीते प्रथमस्थाने ६ अध्याये ॥) धूर्त्तः । लवणम् । (यथा, रामायणे । २ । ७३ । ३ ।
"दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः ।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम्" ॥)
काचः । भस्म । इति मेदिनी ॥ गुड़ः इति हेमचन्द्रः ॥ टङ्कणः । (अस्य पर्य्याया यथा,—
"सौभाग्यं टङ्कणं क्षारो धातुद्रावकमुच्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सर्ज्जिक्षारः । इति राजनिर्घण्टः ॥ * ॥

क्षारविशेषगुणाः ।

"पलाशधवपूतीककरञ्जपाटलादिजाः ।
क्षारास्तु पाचनाः सर्व्वे रक्तपित्तकराः सराः ।
गुल्मार्शःक्रिमिगुल्मघ्नाः शर्करादमरिनाशनाः" ॥
इति राजवल्लभः ॥ (क्षारसामान्यगुणा यथा,—
"क्षारः सर्व्वश्च परमं तीक्ष्णोष्णः क्रिमिजिल्लघुः ।
पित्तासृग्दूषणः पाकी छेद्यहृद्यो विदारणः ।
अपथ्यः कटुलावण्याच्छुक्रौजःकेशचक्षुषाम्" ॥
इति सूत्रस्थाने षष्ठेऽध्याये वाभटेनोक्तम् ॥)

क्षारकः, पुं, (क्षरतीति । क्षर् + ण्वुल् ।) अचिरजातपत्रम् । तत्पर्य्यायः । जालकम् २ । इत्यमरः ॥ जालि इति भाषा । पक्षिमत्स्यादिपिटकम् । खाँचा इति भाषा । इति मेदिनी ॥ रजकः । इति शब्दमाला ॥ (स्वार्थे कन् । क्षारः । यथा, सुश्रुते ।
"तन्मालती क्षारकसैन्धवायुतं
सदाञ्जनं स्यात्तिमिरेऽथ रागिणि" ॥)

क्षारतैलं, क्ली, (क्षारयुतं क्षाराख्यं वा तैलम् ।) पक्वतैलविशेषः । यथा,—
"मुष्ककमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवन्तथा ।
भूर्ज्जग्रन्थि विड़ं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्व्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्ककृतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम्" ॥
इति गरुड़े १९८ अध्यायः ॥

क्षारत्रयं, क्ली, (क्षाराणां त्रयम् ।) त्रिविधक्षारः । तद्यथा, राजनिर्घण्टे ।
"सर्ज्जिकञ्च यवक्षारं टङ्कणक्षारमेव च ।
क्षारत्रयञ्च त्रिक्षारं क्षारत्रितयमेव च" ॥
("सर्ज्जिका यावशूकश्च क्षारद्वयमुदाहृतम् ।
टङ्कणेन युतं तत्तु क्षारत्रयमुदीरितम् ।
मिलितन्तद्गुणक्षारविशेषाद् गुल्महृत् परम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षारदला, स्त्री, (क्षारो दलेषु पत्रेषु अस्याः । क्षुद्रवास्तूकशाकविशेषः ।) चिल्ली । इति राजनिर्घण्टः ॥ (चिल्लीशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

क्षारदशकं, क्ली, (दशविधाः क्षाराः अत्र । कप् क्षाराणां दशकमित्येके ।) दशविधक्षारः । यथा,—
"शिग्रुमूलकपलाशचुक्रिका-
चित्रकार्द्रकसनिम्बसम्भवैः ।
इक्षुशेखरिकमोचिकोद्भवैः
क्षारपूर्व्वदशकं प्रकीर्त्तितम्" ॥
इति राजनिर्घण्टः ॥

क्षारद्रुः, पुं, (क्षारप्रधानको द्रुमः ।) घण्टापाटलिवृक्षः । इति रत्नमाला ॥ (घण्टापाटलिशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञातव्याः ॥)

क्षारपत्रः, पुं, (क्षारः पत्रेषु यस्य ।) वास्तूकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"वास्तूकं वास्तुकञ्च स्यात् क्षारपत्रञ्च शाकराट्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य वास्तूकशब्दे ज्ञातव्याः ॥)

क्षारपत्रकः, पुं, (क्षारपत्र + स्वार्थे कन् कप् वा ।) वास्तूकः । इति हेमचन्द्रः ॥

क्षारभूमिः, पुं, (क्षारोत्पादनक्षमा भूमिः ।) लवणमृत्तिकदेशः । यथा,—
"जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः ।
किमाश्चर्य्यं क्षारभूमौ प्राणदा यमदूतिका" ॥
इत्युद्भटः ॥ (क्षारस्य भूमिः स्थानम् ।) लवणभूम्यां स्त्री ॥

क्षारमध्यः, पुं, (क्षारो मध्येऽस्य ।) अपामार्गः । इति रत्नमाला ॥ (अपामार्गशब्दे ऽस्य गुणादयो व्याख्याताः ॥)

क्षारमृत्तिका, स्त्री, (क्षारयुक्ता मृत्तिका ।) लवणमृत्तिका । तत्पर्य्यायः । ऊषः २ । इत्यमरः ॥ उषः ३ । इति शब्दरत्नावली ॥

क्षारवृक्षः, पुं, (क्षारप्रधानको वृक्षः ।) मुष्ककः । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठं, क्ली, (क्षारेषु श्रेष्ठम् ।) वचक्षारम् । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठः, पुं, (क्षारःश्रेष्ठोऽत्र ।) पलाशः । मुष्ककः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा ।
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षारषट्कं, क्ली, (क्षाराणां षट्कम् ।) षड्विधक्षारः । यथा,—
"धारापामार्गकुटजलाङ्गलीतिलमुष्ककैः ।
क्षारैरेतैस्तु मिलितैः क्षारषट्कादयो गणाः" ॥
इति राजनिर्घण्टः ॥

क्षारसिन्धुः, पुं, (क्षारैर्युक्तः क्षारप्रधानः सिन्धुर्वा ।) लवणसमुद्रः । स तु जम्बुद्वीपस्य दक्षिणे शाकद्वीपस्य उत्तरे वर्त्तते । यथा,—
"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

क्षारमेलकः, पुं, (क्षाराणां मेलः संघः । ततः स्वार्थे कन् ।) सर्व्वक्षारः । इति राजनिर्घण्टः ॥

क्षाराच्छं, क्ली, (क्षारेषु अच्छं निर्म्मलम् । समुद्रजातलवणस्य स्वच्छतया तथोक्तम् ।) सामुद्रलवणम् । इति हारावली ॥ (सामुद्रलवणशब्दे ऽस्य गुणादिकं ज्ञेयम् ॥)

क्षाराष्टकं, क्ली, (क्षाराणां अष्टकम् ।) अष्टप्रकारक्षारः । तद्यथा, —
"पलाशवज्रिशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्ज्जिका चेति क्षाराष्टकमुदाहृतम् ॥
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम्" ॥
इति भावप्रकाशः ॥

क्षारिका, स्त्री, (क्षर् + ण्वुल् + टाप् च । अत इत्वम् ।) क्षुधा । इति हारावली ॥

क्षारितः, त्रि, (क्षर् + णिच् + कर्म्मणि क्तः ।) अभिशस्तः । अपवादग्रस्तः । इत्यमरः ॥ (यथा, महाभारते २ । युधिष्ठिरनारदसंवादे । ५ । १०५ ।
"कच्चिदार्य्यो विशुद्धात्मा क्षारितश्चौरकर्म्मणि ।
अदृष्टशास्त्रकुशलैर्न लोभाद्वध्यते शुचिः" ॥)
स्रावितः । क्षारः । इति मेदिनी ॥

क्षारोदः, पुं, (क्षारं उदकं यस्मिन् । क्षार उदके यस्य वा । उत्तरपदस्य चेत्युदकस्य उदादेशः ।) लवणसमुद्रः । यथा, "क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्तजलधयः । सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्व्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः" । इति श्रीभागवते ५ स्कन्धे १ अः ॥

क्षालनं, क्ली, (क्षल् + णिच् + भावे ल्युट् ।) प्रक्षालनम् । धौतकरणं यथा,—
"स्त्रीशूद्रौ चाथ नित्याम्भःक्षालनाच्च करौष्ठयोः" ।
इति ब्रह्मपुराणम् । इत्याह्निकाचारतत्त्वम् ॥
(यथा च, मार्कण्डेयपुराणे । १६ । १९ ।
"श्लेष्ममूत्रपुरीषासृक्प्रवाहक्षालनेन च ।
रहश्चैवोपचारेण प्रियसम्भाषणेन च" ॥)

क्षालितं, त्रि, (क्षल् + णिच् + क्तः ।) कृतप्रक्षालनम् । तत्पर्य्यायः निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४ धौतम् ५ । इति हेमचन्द्रः ॥ (यथा, माघे । १० । १४ ।
"अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्य्यम् ।
क्षालितन्नु शमितन्नु वधूना-
न्द्रावितन्नु हृदयम्मधुवारैः" ॥)

क्षि, क्षयैश्वर्य्ययोः । इति कविकल्पद्रुमः । (भ्वां-परं-सकं, ऐश्वर्य्ये—अकं-अनिट् ।) क्षयति पापम् । इति दुर्गादासः ॥

क्षि, न ग ब हिंसायाम् । इति कविकल्पद्रुमः । (स्वां-क्र्यां च-परं-सकं-अनिट् ।) न, क्षिणोति । ग, क्षिणाति । ब, क्षिया । (यथा, शान्तिशतके ५ ।
"धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतामानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्के